ॐ

## संस्कृतभारती – तेलङ्गाणा

## पत्रालयद्वारा संस्कृतम् - कोविदपरीक्षा – फरवरी – २०२३

समयः घण्टात्रयम् दिनाङ्कः २६.०२. २०२३

पूर्णाङ्काः १०० फाल्गुण शुक्लसप्तमी भानुवासरः

---

**I (अ) समस्तपदं लिखित्वा समासनाम लिखत (षण्णाम्) ।** १ x ६ = ६

१. नखैः भिन्नः
२. द्व्यधिका विंशतिः
३. नवानां रात्रीणां समाहारः
४. वाक् च अर्थश्च
५. सीतया सह वर्तते इति (रामः)
६. न विद्यते बलं यस्याः सा (स्त्री)
७. अर्थम् अर्थम्
८. नगरस्य समीपे

**(आ) स्थूलाक्षरैः निर्दिष्टानां पदानां (षण्णाम्) विग्रहवाक्यानि लिखित्वा समासनाम लिखत ।** १ x ६ = ६

१. ऋषयः ***तपोधनस्य*** व्ययं कर्तुं न इच्छन्ति ।
२. भक्तः ***सप्तशत्याः*** पारायणं करोति ।
३. ***प्रतिसदने*** संस्कृतं विलसेत् ।
४. विघ्नोपशान्तये ***प्रसन्नवदनं*** विष्णुं ध्यायेत् ।
५. मानवः ***क्रोधोद्वेगभयैः*** विमुक्तः भवेत् ।
६. ***दीर्घरज्जुम्*** आनयतु ।
७. ***हरित्रातः*** भक्तः हरिं नमति ।
८. पुत्र ! ***पाणिपादं*** प्रक्षाल्य आगच्छ!

**(इ) अधोनिर्दिष्टेषु वाक्येषु रेखाङ्कितानि पदानि परिष्कुरुत (पञ्च) ।** १ x ५ = ५

१. तत्पुरुषसमासः अन्यपदप्रधानः अस्ति ।
२. निर्देशकेषु सत्यजित् प्रसिद्धतरः ।
३. कार्यदर्शिणा कार्यं कृतम् ।
४. अरविन्दगान्धिमार्गयोः गान्धिमार्गः दीर्घतमा ।
५. गणे पञ्च अक्षराणि भवन्ति ।
६. अलङ्कारौ त्रयः प्रकारौ ।

**(ई) विग्रहवाक्यं लिखत ।** २ x ३ = ६

१. भीमराजपुत्री
२. कर्णाटकराज्यमन्त्री
३. संस्कृतसाहित्याभ्यासः

**(उ) सूक्तिद्वयस्य विवरणं स्वभाषया लिखत ।** १ x २ = २

१. आपत्काले च सम्प्राप्ते यन्मित्रं मित्रमेव तत् ।
२. उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
३. यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।

**II (अ) अधोनिर्दिष्टानां तद्धितान्तानां विग्रहवाक्यं लिखत ।** १ x ६ = ६

१. वाल्मीकिः
२. धनी
३. स्थूलत्वम्
४. अश्ववत्
५. वैयाकरणः
६. जानकी

**(आ) निर्देशानुसारं उत्तरं लिखत ।** १ x ६ = ६

१. वह् (णिच् लट् प्र. ए.व)
२. पठ् (णिच् लङ् प्र. ए.व)
३. दृश् (णिच् तुमुन्)
४. हस् (णिच् क्त्वा)
५. पा (णिच् तवतु)
६. लिख् (णिच् लोट्)

(इ) **अधः दत्तानां सन्नन्तरूपाणि / अर्थविवरणं वा लिखत ।** १ x ५ = ५

१. दातुम् इच्छति
२. मुमुक्षवः
३. ज्ञातुम् इच्छा
४. ईप्सुः
५. शुश्रूषा

III (अ) **गुरुलघुचिह्नम् अङ्कयित्वा गणनाम लिखत (पञ्चानाम्) ।** १ x ५ = ५

१. भरतः २. जगाद ३. आरुह्य ४. क्रीणाति ५. कर्तरी ६. विवृणु

(आ) **गुरुलघुचिह्नानि अङ्कयित्वा छन्दसः नाम निर्दिशत ।** १ x ३ = ३

कण्डूयमानेन कटं कदाचित्

(इ) **अधो दत्तेषु वाक्येषु कः अलङ्कारः तस्य कारणं किम्? (त्रयाणाम्) ।** १ x ३ = ३

१. कुम्भकर्णः तालवृक्षः इव आसीत्।
२. वृद्धिः को वा न वाञ्छति।
३. सः सेवाव्रतम् आचरति।
४. तिमिङ्गिलस्यास्य तृप्तिः एव नास्ति।

IV (अ) **त्रयाणाम् अन्वयार्थं तात्पर्यं च संस्कृतेन लिखत ।** ३ x ३ = ९

१. सुजनो न याति विकृतिं परहितनिरतो विनाशकालेऽपि ।
छेदेऽपि चन्दनतरुः सुरभयति मुखं कुठारस्य ॥

२. अनेकशास्त्रं बहु वेदितव्यम् अल्पश्च कालो बहवश्च विघ्नाः ।
यत्सारभूतं तदुपासितव्यं हंसो यथा क्षीरमिवाम्बुमध्यात् ॥

३. किं चन्द्रमाः प्रत्युपकारलिप्सया करोति गोभिः कुमुदावबोधम्।
स्वभाव एवोन्नतचेतसां सतां परोपकारव्यसनं हि जीवितम्॥

४. भीमं वनं भवति तस्य पुरं प्रधानं
सर्वो जनः सुजनतामुपयाति तस्य ।
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥

(आ) **पद्यद्वयस्य पदविभागम् अन्वयरचनां च लिखत ।** २ x ४ = ८

१. आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत्॥

२. भूतानुकम्पा तव चेदियं गौरेका भवेत्स्वस्तिमती त्वदन्ते ।
जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि॥

३. कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठम् ।
अवेहि मां किङ्करमष्टमूर्तेः कुम्भोदरं नाम निकुम्भमित्रम्॥

ॐ

**संस्कृतभारती – तेलङ्गाणा**

**पत्रालयद्वारा संस्कृतम् - कोविदपरीक्षा – फरवरी – २०२३**

समयः घण्टात्रयम् | दिनाङ्कः २६.०२. २०२३

पूर्णाङ्काः १०० | फाल्गुण शुक्लसप्तमी भानुवासरः

---

**V (अ) कः कम् अवदत् इति संस्कृतेन लिखत ।** **१ x ६= ६**

१. शिवपार्वत्योः पुत्रः एव तं हन्तुं समर्थः ।
२. दमयन्ती माम् एव यथा परिणयेत् तथा करोतु ।
३. त्वं सर्वभक्षकः भव। पवित्रम् अपवित्रं सर्वं भक्षय।
४. यदि त्वम् इन्द्रस्य पत्नी भविष्यसि तर्हि सर्वे देवाः त्वां नमस्करिष्यन्ति ।
५. तव इदं शरीरं क्व? तपः कर्तुं बहु दुष्करं, मास्तु प्रयत्नम्॥
६. त्वं भूलोकं गच्छ, तत्र दमयन्त्याः स्वयंवरः भविष्यति।

**(आ) संस्कृतेन उत्तरं लिखत (पञ्चानाम्) ।** **१ x ५ = ५**

१. कुमारसम्भवमहाकाव्ये के के विषयाः उपवर्णिताः ?
२. हंसः किमर्थं विदर्भदेशम् अगच्छत् ?
३.तपसे पार्वती कुत्र गतवती ?
४. दमयन्ती किमर्थं कृशा जाता ?
५. नमस्कृतवतीं पार्वतीं हरः किमिति आशीर्वचनमुक्तवान् ?
६. सरस्वती नलाय किं दत्तवती ?

**(इ) संयोजयत ।** **१ x ६ = ६**

| | |
|---|---|
| १. दशरूपकम् | (अ) भट्टोजिदीक्षितः |
| २. कादम्बरी | (आ) भोजदेवः |
| ३. सिद्धान्तकौमुदी | (इ) बाणभट्टः |
| ४. चम्पूरामायणम् | (ई) धनञ्जयः |
| ५. चम्पूभारतम् | (उ) बादरायणः |
| ६. उपनिषदः | (ऊ) अनन्तभट्टः |

**(ई) अधो दत्तं विषयं अधिकृत्य मातरं एकं लेखं लिखतु ।** **१ x ३ = ३**

विषयः- भवतः नूतन विश्वविद्यालयस्य विषयं कानिचन विशेषणानि ।

**(उ) अधः प्रदत्तान् बिन्दून् उपयुज्य विद्यायाः विषये संस्कृतेन प्रबन्धं (दशवाक्यैः) रचयत।** **१ x ४ = ४**

- विद्यायाः महत्वम्
- श्रद्धया विद्या प्राप्यते
- अस्माकं कर्तव्यम्
- २. विद्यार्जनक्रमः
- विद्यासाधनानि

**(ऊ) अन्तलिङ्गविभक्तिवचनानि / पदविवरणं लिखत (षण्णाम्) ।** **१ x ६ = ६**

१. खुरन्यासपवित्रपांसुम्
२. अवेहि
३. आत्मानुचरस्य
४. विहाय
५. कुर्वन्
६. विद्याधरहस्तमुक्ता
७. वसिष्ठेन

**जयतु संस्कृतम् । जयतु भारतम् ।**